भविष्यति

# सप्तमी शलाकापरीक्षा

**(‘मनोरमा’पुरस्कारः)**

**संस्कृतभारत्या आ षड्भ्यः वर्षेभ्यः व्याकरणे न्याये च शलाकापरीक्षा अखिलभारतस्तरे सञ्चाल्यमाना अस्ति । अधिकाः परीक्षार्थिनः भागं वहेयुः, सर्वेभ्यः राज्येभ्यः च आगच्छेयुः इति धिया परीक्षायाः निमित्तं सरलाः ग्रन्थाः स्वीकृताः । न्यायव्याकरणाभ्यां सह काव्यमपि स्वीकृतम् । न्यायव्याकरणयोः छात्राणाम् आनुकूल्याय परीक्षाग्रन्थेषु विकल्पः अपि प्रदत्तः ।**

## विषयाः

**न्याये** - न्यायबोधिनीसहितः तर्कसङ्ग्रहः, अथवा दीपिकासहितः तर्कसङ्ग्रहः । व्याख्यानस्यापि कण्ठस्थीकरणम् अपेक्षितम् ।

**व्याकरणे** - लघुसिद्धान्तकौमुदी (सम्पूर्णा) अथवा अष्टाध्यायी । (अष्टाध्याय्याः कण्ठस्थीकरणेन सह सूत्रार्थविवरणसामर्थ्यम् अपि अपेक्षितम्)

**काव्ये** - रघुवंशे आदितः पञ्च सर्गाः । (श्लोकानां कण्ठस्थीकरणेन सह तेषां पदपरिचयान्वयादिभिः सह सामान्यरूपेण व्याख्यानसामर्थ्यम् अपेक्षितम्)

## नियमाः

- परीक्षा त्रिस्तरीया भविष्यति । प्रथमे स्तरे कण्ठस्थीकरणस्य, द्वितीये स्तरे व्याख्यानसामर्थ्यस्य, तृतीये स्तरे शङ्का-समाधानशक्तेः च परीक्षणं करिष्यते । प्रतिस्तरं त्रिवारं शलाकां पुस्तके प्रवेश्य पृच्छा करिष्यते । त्रिषु अपि स्तरेषु उत्तीर्णता अनिवार्या ।
- पूर्वपूर्वस्तरे उत्तीर्णः उत्तरोत्तरस्तरं प्रति गन्तुम् अर्हः ।
- विद्यालयस्य / महाविद्यालयस्य प्राचार्यः/ विभागप्रमुखः परीक्षार्थिनां नाम कक्ष्यापरीक्षाविषयादिविवरणं डिसेम्बर्मासस्य १५ तः पूर्वं परीक्षास्थानं (अधोनिर्दिष्टपत्रसङ्केतं) प्रति सूचयेत् । तदनन्तरं सूचितवतां प्रवेशः न अनुमन्येत ।
- परीक्षार्थी न्याय-व्याकरण-काव्येषु कस्मिंश्चित् एकस्मिन् एव विषये परीक्षां स्वीकर्तुम् अर्हति । मार्गव्ययः परीक्षार्थिना स्वयं, प्रेषयित्रा विद्यालयेन वा वोढव्यः ।
- मध्यमा, शास्त्री, बि.ए. इत्यादीनां, तत्समकक्ष्याणां वा छात्राः एव (तद्वयस्तरीयाः वा) परीक्षार्थम् अर्हाः ।
- गते वर्षे यस्मिन् विषये येन उत्तीर्णता प्राप्ता स्यात् तस्मिन् विषये सः परीक्षार्थी भवितुं नार्हति । (विषयान्तरस्य परीक्षार्थिता अनुमन्येत)
- उत्तीर्णाय सर्वस्मै अपि कश्चन धनराशिः प्रमाणपत्रं च मनोरमापुरस्काराङ्गतया दास्यते । अनुत्तीर्णेभ्यः प्रमाणपत्रादिकं किमपि न दास्यते ।
- परीक्षार्थिनः पूर्वदिने (७.१.१२ दिनाङ्के) रात्रितः पूर्वं परीक्षास्थलं प्राप्नुयुः । परीक्षास्थले पूर्वदिने, परीक्षादिने, तदनन्तरदिने च आवासभोजनादिव्यवस्था संस्कृतभारत्या उपकल्पयिष्यते ।
- उत्तीर्णतादिविषये परीक्षकाणां निर्णयः एव अन्तिमः ।

---

परीक्षातिथिः - ८.०१.२०१२, भानुवासरः

स्थानम् - **‘अक्षरम्’**, ८ क्रास्, २ फेस्, गिरिनगरम्, बेङ्गलूरु - ५६० ०८५

सम्पर्कसङ्केतः - कार्यालयप्रमुखः, ‘Aksharam’, 8th Cross, 2nd Phase, Girinagar
**BANGALORE - 560 085**, Tel: 080-26722576 / 26721052 E-mail: samskritam@gmail.com